# संस्कृत वार्ता:

दिनाङ्क : 22.06.2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- पश्चिमबङ्गे भाजपा-नेतृत्वे सर्वकारेण प्रप्रथमं पूर्णं अर्थसंकल्पनापत्रम् उपस्थापितम्; यस्मिन् सामाजिक-कल्याणं, आधारभूत-संरचना-विकासं, आजीविका-सृजनं समेत्य अनेकाः महिला-केन्द्रित-योजनाः सन्ति घोषिताः।
- सुरक्षा-समाह्वानानां विषये चर्चयितुं नवदिल्ल्याम् अद्य 'ब्रिक्स' राष्ट्रीय-सुरक्षा-परामर्शदातृणां सम्मेलनम् आरब्धम्।
- आर्थिक-सम्बन्धान् इतोऽपि दृढीकर्तुं विदेशमन्त्री डॉ. एस्. जयशङ्करः स्वकीय-समकक्षेन सह चर्चार्थं मङ्गोलिया-देशं सम्प्राप्तवान्।
- भारतीय-ऋतु-विभागेन अद्य असम-मेघालयराज्ययोः कृते अतिवृष्टेः पूर्वानुमानं कृतम्।
- अस्य वर्षस्य फ़ीफ़ा-विश्वकप्-क्रीडायां अर्जेण्टीना-दलम् अद्य रात्रौ अमेरिकादेशस्य आर्लिंग्टन्-नगरे ग्रूप-जे-क्रीडायां आस्ट्रिया-दलं सम्मुखी करिष्यति।

----------------------------------

<u>भाजपा-पश्चिमबङ्गाल</u>

भाजपानेतृत्वे पश्चिमबङ्गप्रशासनेन अद्य प्रवर्तमान-वित्तीयवर्षस्य कृते स्वीयं प्रथमं पूर्ण-अर्थसंकल्पनापत्रं प्रस्तुतम्। अस्मिन् पत्रे सामाजिक-कल्याणं, आधारभूत-संरचना-विकासः, वृत्ति-सृजनं तथा महिला-केन्द्रित-योजनाः विशेषरूपेण प्राधान्यं प्राप्ताः सन्ति। बंगालस्य वित्तमन्त्री स्वपन दासगुप्ता सप्तत्युत्तरषट्सहस्र-कोटि-रूप्यकाणां अर्थसंकल्पनापत्रम् उपस्थापयन् एतत् विकसित-बङ्गाल-निर्माणस्य मार्गचित्रमिति अवदत्। तेन स्पष्टीकृतं यत् राज्यस्य उपरि वर्तमानकालीनं ऋणं अष्ट लक्षकोटिरूप्यतोप्यधिकम् अस्ति, अतः वित्तीय-अनुशासनं अस्माकं अत्यंतं मुख्या प्राथमिकता अस्ति। अर्थसंकल्पनायाः प्रमुखासु घोषणासु विद्यते वृत्यवसराः । राज्ये रिक्त- एकलक्ष सर्वकारीय-पदेषु

नियुक्तिं करिष्यते, यस्मिन् विंशतिसहस्र आरक्षक-पदानि तथा पंचाशत् सहस्र शिक्षक-पदानि सम्मिलितानि सन्ति।
एतेषु रिक्तेषु पदेषु त्रयस्त्रिंशत् प्रतिशतं स्थानं महिलाभ्यः आरक्षितं भविष्यति, सहैव दश प्रतिशतं अतिरिक्त-आरक्षणम् अग्निवीरेभ्यः निर्धारितं कृतम्।

----------------------------------

**ब्रिक्स**

नवदिल्ल्यां ब्रिक्स सङ्घटनस्य राष्ट्रिय-सुरक्षा-परामर्शदातृणां द्विदिवसीयम् उपवेशनम् अद्य आरब्धम्। भारतस्य राष्ट्रिय-सुरक्षा-परामर्शदातृ अजीत डोभालस्य अध्यक्षतायां प्रचलन्त्याम् अस्यां गोष्ठ्याम् अस्य समूहस्य एकादश सदस्यदेशानां सुरक्षाप्रमुखाः भागं भजन्ति। एतेषु सदस्यदेशेषु भारत, ब्राजील, चीन, मिस्र, इथियोपिया, इण्डोनेशिया, ईरान, रूस, साउदी अरब, दक्षिण अफ़्रीका तथा संयुक्त अरब अमीरात सम्मिलिताः सन्ति। अवधेयं यत् षड्विंशत्युत्तर द्विसहस्रतमे वर्षे भारतेन चतुर्थवारं 'ब्रिक्स' सङ्घटनस्य अध्यक्षता प्राप्ता अस्ति, यस्य अन्तर्गतमेव एतत् आयोजनं संभवति।

अजीत डोभालः अद्य ईरान-देशस्य 'एस.एन.एस.सी.' संस्थायाः रक्षाविषयक-उपसचिवेन गदीर निजामीपुर इत्यनेन सह द्विपक्षीय-मन्त्रणां कृतवान्। विदेश-मन्त्रालयानुसारम्, उभयपक्षतः पश्चिम-एशिया क्षेत्रस्य वर्तमान-स्थितेः समीक्षा, 'ब्रिक्स' मञ्चस्य अन्तर्गतं सहयोगविषये तथा भारत-ईरान-द्विपक्षीय-सम्बन्धे चर्चा अभवत्। अस्मिन्नेव क्रमे, श्री डोभालः इथियोपिया-देशस्य 'राष्ट्रिय गुप्तचर एवं सुरक्षा सेवा' संस्थायाः विश्लेषण-कार्यकारि-निदेशकेन मिलियन लेमा तादेसे महोदयेन सह अपि अमिलत्।

----------------------------------

**जयशङ्करः**

विदेशमन्त्री डॉ. एस्. जयशङ्करः अद्य द्विविसीय-प्रवासाय मङ्गोलिया-देशं सम्प्राप्तवान्, यस्य उद्देश्यं द्वयोः देशयोः मध्ये विशिष्ट-सहभागित्वम् इतोऽपि सुदृढं करणीयम् अस्ति। एकस्मिन् सामाजिकपटले एकेन सन्देशेन डॉ. जयशङ्करः अवोचत् यत् अहं मङ्गोलिया-देशे निष्कर्षयुत-संवादाय आशावान् अस्मि। अस्य प्रवासस्य अन्तर्गतं विदेशमन्त्री मङ्गोलिया-देशस्य शीर्षनेतृभिः सह मेलिष्यति, अपि च स्वकीय-समकक्षया विदेशमन्त्रिण्या बी. बाट्टसेटसेग वर्यया सह चर्चां करिष्यति। स्वकीय-भ्रमणस्य द्वितीये चरणे, विदेशमन्त्री बुधवासरे दक्षिणकोरिया-देशं प्राप्स्यति। तत्र सः दक्षिणकोरियायाः विदेशमन्त्रिणा चो ह्युन महोदयेन सह द्विपक्षीय-वार्तां विधास्यति। अनेन सहैव, सः गुरुवासरे 'जेजू' द्वीपे आयोज्यमाने 'जेजू फोरम फॉर पीस एण्ड प्रोस्पेरिटी' इत्याख्ये सम्मेलने मुख्यभाषणम् अपि प्रदास्यति।

----------------------------------

<u>लखनऊ- अग्निकाण्डः</u>

लखनऊ-नगरस्य अलीगञ्ज्-क्षेत्रे एकस्य आपणस्य उपरि कार्यरते कोचिङ्ग्-इति शिक्षणकेन्द्रे प्रचण्डः अग्निकाण्डः अभवत्, येन छात्रेषु आतङ्कः उत्पन्नः। केचन व्रणिताः जनाः, चिकित्सालयेषु प्रवेशिताः सन्ति। मृतानां सङ्ख्या इदानीमपि अस्पष्टा अस्ति। उत्तरप्रदेशस्य उपमुख्यमन्त्री ब्रिजेश पाठकः तत्र आगत्य स्थानीयप्रशासनेन, आरक्षकैः, एस्. डी. आर्. एफ्. दलैः च सञ्चाल्यमानस्य उद्धारकार्यस्य निरीक्षणं कृतवान्। संस्थायाः भवनस्य अन्तः अग्निः उद्भूतः तथा द्रुतगत्या प्रसृतः च, जनाः अन्तः एव अवरुद्धाः अभवन् इति कथ्यते। एषः एकः क्रयणसङ्कुलम् आसीत् यस्मिन् प्रशिक्षणं, क्रीडाक्षेत्रादिकम् आसीत्। अग्निसुरक्षा-दलानि, आरक्षकाः, जनपद-प्रशासनस्याधिकारिणः च उद्धारस्य, निष्कासनस्य च प्रयत्नान् आरब्धवन्तः। केचन छात्राः कोचिङ्ग् इत्यस्य शौचालये प्रच्छन्नं भूत्वा आत्मानं रक्षितवन्तः। केचन जनाः प्रथमतलात् कुर्दयित्वा स्वप्राणान् रक्षितवन्तः रक्षादलेनापि तान् रक्षितम्।

----------------------------------

<u>कीर स्टार्मरः</u>

यू. के. देशस्य प्रधानमन्त्री कीर स्टार्मरः स्वदलस्य वर्धमानस्य आन्तरिकद्वन्द्वे डाउनिङ्ग् स्ट्रीट् इत्यत्र स्वस्य कार्यावधिं समाप्य, लेबर-पार्टीति दलस्य नेतुः पदात् सहैव प्रधानमन्त्रिणः पदात् त्यागपत्रस्य घोषणाम् अकरोत्। स्वस्य त्यागपत्र-वक्तव्ये, श्रीस्टार्मरः द्विवर्षात् प्राक् डाउनिङ्ग् स्ट्रीट् इत्यत्र स्वस्य आगमनं जीवनस्य गौरवपूर्णतमं क्षणत्वेन स्मृतवान्, कोटिशः जनानां जीवनं परिवर्तयितुं लक्ष्यं स्वीकृत्य राजनीतौ प्रविष्टवान् इति सः उक्तवान्।

-----------------------------------

<u>ऋतु-विज्ञान-विभागेन</u>

भारतीय-ऋतु-विभागेन अद्य असम-मेघालय राज्ययोः कृते अति वृष्टेः रेड-अलर्ट इति रक्त वर्णीया-संचेतना उद्घोषिता अस्ति। विभागेन श्वः पर्यन्तं उप-हिमालयी-पश्चिमबङ्ग, कर्नाटक, तेलंगाना, केरलम्, गोवा, ओडिशा तथा देशस्य उत्तर-पूर्वीय-भागस्य पृथक्-पृथक् स्थानेषु अति वृष्टेः पूर्वानुमानम् अपि ख्यापितम्। अनेन सहैव, विभागेन अद्य हरियाणा, चण्डीगढ़, दिल्ली, पञ्जाब, हिमाचलप्रदेश, उत्तराखण्ड, मध्यप्रदेश, महाराष्ट्र, अण्डमान-निकोबार-द्वीपसमूह, जम्मू-कश्मीर तथा लद्दाख क्षेत्रेषु विद्युत्-गर्जनं समेत्य झञ्झावातः तथा तीव्र-प्रचण्डवायोः सम्भावना च व्यक्तीकृता।

-----------------------------------

<u>फ़ीफ़ा</u>

अस्य वर्षस्य फ़ीफ़ा-विश्वकप्-क्रीडायां अर्जेण्टीना-दलम् अद्य रात्रौ अमेरिकादेशस्य आर्लिंग्टन्-नगरे ग्रूप-जे-क्रीडायां आस्ट्रिया-दलं सम्मुखी करिष्यति। भारतीयसमयानुसारं रात्रौ सार्द्ध दशवादने क्रीडायाः आरम्भः भविष्यति।

।। इति वार्ता: ।।